# चन्द्रालोकः

( प्राक्शास्त्री-द्वितीयवर्षम्, षष्ठं प्रश्नपत्रम्, चन्द्रालोकस्य प्रथमः मयूखः )

डॉ. जितेन्द्र तिवारी
साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, अगरतला, त्रिपुरा

1. चन्द्रालोकस्य रचयिता कः ?
उ. पीयूषवर्षः जयदेवः ।
2. जयदेवस्य उपनाम किम् ?
उ. पीयूषवर्षः ।
3. जयदेवस्य पितुः नाम किम् ?
उ. महादेवः।
4. जयदेवस्य मातुः नाम किम् ?
उ. सुमित्रा ।
5. जयदेवस्य गोत्रं नगरं च किम् ?
उ. कौण्डिन्यगोत्रम्, कुण्डिनपुरं विदर्भदेशः ।
6. जयदेवः कस्य उपासकः ?
उ. श्रीरामचन्द्रस्य ।
7. चन्दालोके किं नामधेयोऽध्यायाः विभक्ताः कति च ?
उ. मयूखनाम्ना दशाध्यायाः वर्तन्ते । (दश मयूखाः सन्ति) ।
8. जयदेवस्य कति रचनाः ?
उ. रचनाद्वयम् – 1. प्रसन्नराघवम् 2. चन्द्रालोकः ।
9. चन्द्रालोक इति पदस्य व्युत्पत्तिः का ?
उ. चन्द्रमसः आलोक इव काव्योपयोगिनां विषयाणां प्रकाशः यस्मिन्निति चन्द्रालोकः ।
10. जयदेवस्य समयः कः ?
उ. द्वादशतमी शताब्दी वर्तते ।
11. चन्द्रालोकस्य प्रथममयूखे के विषयाः वर्णिताः ?
उ. काव्यहेतुः काव्यलक्षणं शब्दानां भेदाश्च वर्णिताः ।
12. चन्द्रालोकस्य मङ्गलपद्ये किं छन्दः (वृत्तम्) ?
उ. शार्दूलविक्रीडितम् ।
13. जयदेवः चन्द्रालोकस्य मङ्गलपद्ये कस्य देवस्य वर्णनं कुरुते ?
उ. भगवत्याः सरस्वत्याः भगवतः शिवस्य च ।

© डॉ. जितेन्द्रतिवारी, साहित्यविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, अगरतला, त्रिपुरा, मो. 9039 712018

14. मङ्गलं कतिविधं भवति ?

उ. त्रिविधम् – नमस्कारात्मकम्, आशीर्वादात्मकम्, वस्तुनिर्देशात्मकम्।

15. चन्द्रालोके कीदृशं मङ्गलम् ?

उ. वस्तुनिर्देशात्मकम्।

16. नेत्रत्रितयी इव का दीव्यतु ?

उ. वाग्देवता (भगवती सरस्वती)।

17. 'नेत्रत्रितयी' इति पदस्य व्युत्पत्तिं लिखत।

उ. त्रयः अवयवाः यस्य सा त्रितयी नेत्राणां त्रितयी इति नेत्रत्रितयी अर्थात् लोचनत्रयम्।

18. मङ्गलपद्ये लोचनत्रयेण किं स्वीकृतम् ?

उ. सूर्य-चन्द्र-अग्निरूपं लोचनत्रयं स्वीकृतम्।

19. वाग्देवता उच्चैः किं अस्यति (प्रक्षिपति) ?

उ. मन्दताम् अरसताम् अस्यति। नीरसतां मन्दमतित्वम् इति।

20. मङ्गलपद्ये कः अलङ्कारः ?

उ. शब्दश्लेषानुप्राणितः पूर्णोपमालङ्कारः।

21. रवध्वंसः (शब्दविनाशः) केन हस्तयते (दूरीकरोति) ?

उ. जाग्रत्कलङ्कैः (शास्त्रान् अभ्यासजन्यसमाजजाड्यादयो दोषाः इति जाग्रत् कलङ्काः)।

22. सुमनसां मानसे उल्लासिनी का भवति ?

उ. वाग्देवता सुमनसां मानसे उल्लासिनी भवति।

23. रसान् के संवर्धयन्ताम् ?

उ. चिन्मयचित्तचन्द्रमणयः रसान् संवर्धयन्ताम्।

24. चन्द्रालोकस्य प्रयोजनं किम् ?

उ. अत्र अलङ्कारादयो विषयाः तेषाम् अवरोधः एव प्रयोजनम्।

25. अनुबन्धचतुष्टयं किम् ?

उ. सम्बन्धश्चाधिकारी च विषयश्च प्रयोजनम्। ग्रन्थादौ तेन वक्तव्यं तस्मात् ग्रन्थः प्रशस्यते।।

26. ग्रन्थप्रयोजनं कस्मिन् श्लोके वर्णितम् ?

उ. द्वितीये श्लोके – हं हो चिन्मयचित्तचन्द्रमणयः संवर्धयध्वं रसान् इति।

27. 'चिन्मयचित्तचन्द्रमणयः' इति पदस्य व्युत्पत्तिं प्रदर्शयत।

उ. चिन्मयानि-चित्प्रचुराणि यानि चित्तानि-अन्तःकरणानि मनांसि तान्येव चन्द्रमणयः इति।

28. अत्र स्वैरिणी (स्वच्छन्दचारिणी) का ?

उ. निर्विचारकविता स्वैरिणी वर्तते।

29. पीयूषवर्षः स्वयं किं वितनुते ?

उ. चन्द्रालोकं वितनुते। (विस्तारयति)।

30. निर्विचारकविते अस्मत् मा प्रकाशीभव इत्यस्य कः अभिप्रायः ?

उ. अहं निर्विचारकवितां कवयितुं न इच्छामि इति।

31. 'विचारवीचिनिचयालङ्कारवारांनिधेः' इत्यस्य व्युत्पत्तिं लिखत।

उ. विचाराः-भावनाः एव वीचयः-तरङ्गाः तासां निचयः-समूहः यस्य स तादृशो यो अलङ्कार एव वारांनिधिः – समुद्रः तस्य विचारवीचिनिचयालङ्कारवारांनिधेः इति।

32. 'युक्त्यास्वाद्यलसद्रसैकवसतिः' इत्यस्य पदच्छेदं कुरुत।

उ. युक्ति – आस्वाद्य – लसद् – रस – एक – वसतिः।

33. साहित्यसारस्वतक्षीराम्भोधिः इत्यस्य कः आशयः।

उ. सहितस्य भावः साहित्यं – साहित्यशास्त्रम्, सरस्वत्या इदं सारस्वतं – वाङ्मयसाहित्यं च तत् सारस्वतं च साहित्यसारस्वतं तदेव क्षीरं – दुग्धं तस्य अम्भोधिः – समुद्रः इति।

34. काव्यसेवनफलं किम् ?

उ. श्रीरस्मादुपदेशकौशलमयं पीयूषमस्माज्जगत् जाग्रद्भासुरपद्मकेशरयशःशीतांशुरस्माद् बुधाः।

35. चन्द्रालोकग्रन्थमन्थनात् किं लप्स्यते ?

उ. ग्रन्थात् अस्मात् लक्ष्मीः उपदेशकौशलप्रचुरं वचोऽमृतं, कीर्तिरूपश्चन्द्रश्च लप्स्यते।

36. पूर्वाचार्याः के ?

उ. भरत-आनन्दवर्धन-मम्मटादयः आचार्याः।

37. कस्य गुणाः त्रसरेणवः इव प्रकाशन्ते ?

उ. मद्गुणाः (जयदेवस्य गुणाः)।

38. भरतेन कः ग्रन्थः प्रणीतः ?

उ. नाट्यशास्त्रम् इति ग्रन्थः।

39. आनन्दवर्धनेन कः ग्रन्थः रचितः ?

उ. ध्वन्यालोकः।

40. मम्मटेन कः ग्रन्थः रचितः ?

उ. काव्यप्रकाशः।

41. त्रसरेणोः निर्वचनं किम् ?

उ. जालान्तर्गते भानौ यत् सूक्ष्मं दृश्यते रजः। प्रथमं तत् प्रमाणानां त्रसरेणुं प्रचक्षते॥

42. केषाम् उक्तयः सूर्याः इव ?

उ. पूर्वाचार्याणाम् उक्तयः (भरतानन्दवर्धनमम्मटादीनां वचांसि)।

43. मृगाक्षीणां चक्षुः केन इव भूष्यते (अलङ्क्रियते)?

उ. कज्जलेन इव।

44. मृगाक्षीणाम् इति पदस्य व्युत्पत्तिं लिखत।

उ. मृगस्य इव अक्षिणी यासां ताः मृगाक्षिण्यः तासां मृगाक्षीणां हरिणलोचनानां रमणीनाम् इति।

© डॉ. जितेन्द्रतिवारी, साहित्यविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, अगरतला, त्रिपुरा, मो. 9039 712018

45. दूष्यते इत्यस्य कः अर्थः ?

उ. दूषितं क्रियते, मलिनीक्रियते इति।

46. चन्द्रालोकस्य काव्यकारणं किम् ?

उ. प्रतिभैव श्रुताभ्याससहिता कवितां प्रति। हेतुर्मृदम्बुसम्बद्धा बीजमाला लतामिव ॥

47. प्रतिभालक्षणं किम् ?

उ. बुद्धिस्तात्कालिकी ज्ञेया मतिरागामिगोचरा। प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता ॥

48. कवितां प्रति किं कारणम् ?

उ. श्रुताभ्याससहिता प्रतिभा एव कवितां प्रति कारणम्।

49. लतां प्रति किं कारणम् ?

उ. मृदम्बुसम्बद्धा बीजमाला एव लतां प्रति कारणम्।

50. घटं प्रति किं कारणम् ?

उ. यथा घटनिर्माणे मिलितामेव दण्ड-चक्र-चीवराणां कारणत्वं तथैव शास्त्राभ्याससहिता प्रतिभैव काव्यप्रणयने कारणम् इति।

51. मम्मटविरचिते काव्यप्रकाशे काव्यकारणं किम् ?

उ. शक्तिर्निपुणतालोकशास्त्रकाव्याद्यवेक्षणम्। काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे ॥

52. चन्द्रालोकानुसारं काव्यलक्षणं (काव्यस्वरूपम्) किम् ?

उ. निर्दोषा लक्षणवती सरीतिर्गुणभूषणा। सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक् ॥

53. निर्दोषा इति पदस्य व्युत्पत्तिं लिखत।

उ. निर्गता दोषा यस्याः सा निर्दोषा अर्थात् काव्यदोषरहिता इति।

54. मम्मटोक्तं काव्यलक्षणं (काव्यस्वरूपम्) किम् ?

उ. तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।

55. जयदेवः केन प्रमाणेन मम्मटाचार्यस्य मतं दूषयति ?

उ. अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती। असौ न मन्यते कस्मादनुष्णमनलं कृती ॥

56. 'अनलङ्कृती' इति पदस्य कः अर्थः किञ्च वचनम् ?

उ. न अलङ्कृती इति अनलङ्कृती अर्थात् अलङ्काररहितौ इति। अत्र प्रथमा विभक्तिः द्विवचनम् ॥

57. अनलङ्कृती शब्दार्थौ काव्यं कः अङ्गीकरोति ?

उ. मम्मटाचार्यः।

58. शब्दलक्षणं किम् ?

उ. विभक्त्युत्पत्तये योग्यः शास्त्रीयः शब्द इष्यते।

59. शब्दभेदः कतिविधः ?

उ. त्रिविधः – 1. रूढः 2. यौगिकः 3. योगरूढः इति।

60. रूढत्वं नाम किम् ?

उ. तत्र केवलं समुदायशक्त्या अर्थप्रत्यायकत्वं रूढत्वम् इति। यथा – डित्थडवित्थादयः।

61. यौगिकत्वं नाम किम् ?

उ. केवलम् अवयवशक्त्या अर्थप्रत्यायकत्वं यौगिकत्वम् । यथा – पाचकः पाठकादयः शब्दाः ।

62. योगरूढत्वं नाम किम् ?

उ. समुदायशक्त्या अवयवशक्त्या च अर्थप्रत्यायकत्वं योगरूढत्वम् । यथा – पङ्कजादयः शब्दाः ।

63. रूढशब्दस्य भेदाः कतिविधाः के च ते ?

उ. त्रिविधाः – 1. अव्यक्तयोगः 2. निर्योगः 3. योगाभासः ।

64. अव्यक्तयोगः रूढः कः ?

उ. यत्र केवलं समुदायशक्त्यैव अर्थप्रतीतिर्जायते सः अव्यक्तयोगः । यथा – वृक्षादयः शब्दाः ।

65. निर्योगशब्दरूढः कः ?

उ. यत्र च सर्वथा अवयवार्थस्य अननुसन्धानं स निर्योगः । यथा – भूवादयो शब्दाः ।

66. योगाभासः कः ?

उ. यत्र पुनः अवयवार्थे सम्भवत्यपि तात्पर्यविषये सोऽनन्वित एव भासते स योगाभासः । यथा – मण्डपाद्याः शब्दाः ।

67. यौगिकः शब्दः कतिविधः ?

उ. त्रिविधः – 1. शुद्धयौगिकः 2. यौगिकमूलयौगिकः 3. सम्भिन्नयौगिकः ।

68. शुद्धयौगिकः –

उ. प्रकृतिप्रत्यययोगेन यत्र अर्थबोधो जायते स शुद्धयौगिकः शब्दः । यथा – भ्रान्तिः ।

69. यौगिकमूलयौगिकः –

उ. शुद्धयौगिकयोः समासेन यत्रार्थप्रतीतिर्जायते तत्र यौगिकमूलयौगिकत्वम् । यथा- स्फुरत्कान्तिः

70. सम्भिन्नयौगिकः –

उ. यत्र च यौगिक-अयौगिकयोगेन अर्थबोधो जायते स सम्भिन्नयौगिकः । यथा – कौन्तेयः ।

71. योगरूढः शब्दः कतिविधः ?

उ. त्रिविधः – 1. सामान्यार्थस्थाने विशेषार्थबोधकत्वम् 2. विशेषार्थस्थाने सामान्यार्थबोधकत्वम् 3. सामान्यविशेषोभयार्थबोधकत्वम् इति ।

72. योगरूढशब्दान् लिखत । (के योगरूढशब्दाः) ?

उ. नीरधिः पङ्कजं सौधं सागरो भूरुहः शशी । क्षीरनीरधिराकाशपङ्कजं तेन सिध्यति ॥

73. पदं नाम किम् ?

उ. विभक्त्यन्तं पदम् । सुबन्तं तिङन्तं वा पदं भवति ।

74. वाक्यं किम् ?

उ तद् व्यूहोऽर्थसमाप्तितः अर्थात् पदसमूहः एव वाक्यं कथ्यते ।

75. वाक्यस्योदाहरणं किम् ?

उ. धूमवत्वात् इति । धूमवतो भावो धूमवत्वं तस्मात् धूमवत्वात् इति पदं वाक्यस्योदाहरणम् ।

76. खण्डवाक्यं किम् ?

उ. आमन्त्रणं (सम्बोधनम्) एव खण्डवाक्यं भवति। यथा – हे देव !

77. वाक्यकदम्बकम् इत्यस्य कः अर्थः ?

उ. वाक्यसमूहः।

78. सत्रप्रमुखमखविद्यैकचतुरः कः ?

उ. जयदेवस्य पिता महादेवः।

79. चन्द्रालोकः कान् चिरं सुखयतु ?

उ. सुमनसः पण्डितान् देवान् च।

80. चन्द्रालोकस्य प्रथममयूखस्य नाम किम् ?

उ. वाग्विचारः।

81. काव्यशास्त्रस्य कति सम्प्रदायाः ?

उ. षट् सम्प्रदायाः – रस-अलङ्कार-रीति-ध्वनि-वक्रोक्ति-औचित्याः इति षट् सम्प्रदायाः।

**अलङ्कारसम्प्रदायस्य केचन आचार्याः तेषां ग्रन्थनामानि –**

| | | |
|---|---|---|
| भरतमुनिः | – | नाट्यशास्त्रम् |
| महर्षिव्यासः | – | अग्निपुराणम् |
| भामहः | – | काव्यालङ्कारः |
| दण्डी | – | काव्यादर्शः |
| उद्भटः | – | काव्यालङ्कारसारसङ्ग्रहः |
| वामनः | – | काव्यालङ्कारसूत्रम् |
| रुद्रटः | – | काव्यालङ्कारः |
| मम्मटः | – | काव्यप्रकाशः |
| रुय्यकः | – | अलङ्कारसर्वस्वम् |
| जयदेवः | – | चन्द्रालोकः |
| अप्पयदीक्षितः | – | कुवलयानन्दः |
| विश्वनाथः | – | साहित्यदर्पणः |
| जगन्नाथः | – | रसगङ्गाधरः |

o-o-o